# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** | **गुणा: - ७०** |
| विषय: - फलितज्यौतिषम् | (C.C.- 1.1.1.New ) | |
| दिनाङ्क: - १९/१२/२०१८ | **मुहूर्तचिन्तामणि: ।** | **समय: -०२.०० त: ०५.००** |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** **( १० )**

*(१) नन्दा च भद्रा च जया च रिक्ता पूर्णेतितिथ्योऽशुभमध्यशस्ता: ।*
*सितेऽसिते शस्तसमाधमा: स्यु: सितज्ञभौमार्किगुरौ च सिद्धा: ॥*

*(२) कुयोगास्तिथिवारोत्थास्तिथिभोत्था भवारजा: ।*
*हूंणबंगखशेष्वैव वर्ज्यास्त्रितयजास्तथा ॥*

*(३) रेवापूर्वे गण्डकीपश्चिमे च शोणस्योदग्दक्षिणे नीच इज्य: ।*
*वर्ज्यो नायं कौङ्कणे मागधे च गौडे सिंधौ वर्जनीय: शुभेषु ॥*

**प्रश्न: २ अधोलिखितयो: प्रश्नयो: कस्यचिदेकस्योपरि निबन्धं लिखतु ।** **( १० )**

*(१) मुहूर्तचिन्तामणे: शुभाशुभप्रकरणम् ।*

*(२) आनन्दादि अष्टाविंशतियोगानां नामानि सचक्रं स्पष्टयतु ।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितेभ्य: कयोश्चिद् द्वयो: व्याख्यां करोतु ।** **( १० )**

*(१) स्वात्यादित्ये श्रुतेस्त्रीणिचन्द्रश्चापि चरं चलम् ।*
*तस्मिन् गजादिकारोहो वाटिकागमनादिकम् ॥*

*(२) मूलाहिमिश्रोग्रमधोमुखं भवेदूर्ध्वास्यभार्द्रेज्यहरित्रयं ध्रुवम् ।*
*तिर्यङ्मुखं मैत्रकरानिलादितिज्येष्ठाश्विभानीदृशकृत्यभेषुसत् ॥*

*(३) व्यन्त्यादितिध्रुवमघानिलसार्थधिष्ण्ये रिक्ते तिथौ चरतनौ विकवीन्दुवारे ।*
*स्नानं रुजाविरहितस्य जनस्य शस्तं हीने विधौ खलखगैर्भवकेन्द्रकोणे ॥*

**प्रश्न: ४ अधोलिखितयो: प्रश्नयो: कस्यचिदेकस्योपरि निबन्धं लिखतु ।** **( १० )**

*(१) नक्षत्राणां स्वामिन: (२) रोगनुक्तस्नानमुहूर्त एवं शिल्पशिक्षामुहूर्त: ।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितेभ्य: कयोश्चिद् द्वयो: व्याख्यां करोतु ।** **( १० )**

*(१) जघन्यभे संक्रमणे मुहूर्ता: शरेन्दवो बाणकृता बृहत्सु ।*
*खरामसंख्या: समभे महर्घसमर्घसाम्यं विधुदर्शनेऽपि ॥*

(२) *केन्द्रत्रिकोणेषु शुभैश्च पापैस्त्र्यायारिगैः पुंग्रहदृष्टलग्ने ।*
*ओजांशगेऽब्जेऽपि च युग्मरात्रौ चित्रादितीज्याश्विषुमध्यमं स्यात् ॥*

(३) *क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वा रौद्रेऽर्कविद्गुरुसितेन्दुदिनेव्रतं सत् ।*
*द्वित्रीषुरुद्ररविदिक्प्रमितेतिथौ च कृष्णादिमत्रिलवकेऽपि न चापराह्णे ॥*

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु ।** **( १० )**

*(१) अक्षरारम्भविद्यारम्भमुहूर्तश्च ।*

*(२) ग्रहाणां दोषनिवाराणार्थम् औषधिस्नानम् एवं दानविधिश्च ।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **( १० )**

(१) *मुहूर्तचिन्तामणिग्रन्थस्य लेखकः कः ?*

(२) *जयातिथिः का ?*

(३) *पूर्णिमायाः ईशः कः ?*

(४) *सूर्यतः का संख्या गृह्यते ?*

(५) *शनौपूर्णा भवति चेत् फलं किम् ?*

(६) *चैत्रे कुम्भराशिः शून्यं भवति न वा ?*

(७) *कस्य योगस्य आदौ पञ्चघटी वर्ज्या ?*

(८) *आनन्दादि कति योगाः भवन्ति ?*

(९) *कुम्भकर्क-मीन एवं सिंहराशौ चन्द्रः भवति तदा भद्रा कुत्र निवसति ?*

(१०) *यदा मृत्युलोके भद्रा भवति तदा फलं किम् ?*

(११) *यत् कार्यं गुरु अस्ते वर्ज्यं, तद् कार्यंमेव मकरस्थ गुरौ वर्ज्यं न वा ?*

(१२) *रेवा नदी कुत्र वर्तते ?*

(१३) *क्षिप्रसंज्ञकनक्षत्रं लिखतु ?*

(१४) *मित्रतानक्षत्रे के के नक्षत्राणि सन्ति ?*

(१५) *आषाढभाद्रपदाश्विनमाघमासेषु मूलनक्षत्रस्य वासः कुत्र भवति ?*

--००--